[A]नूतिः, नुवनम्, नूत्वा, प्रणूय, नावम् २ नूत्वा २ इति शुद्धाद्धातो रूपाणि। ण्यन्तात्, सन्नन्तात् यङन्ताच्च क्रमेण नावकः-विका, नुनूषकः, षिका, नोनूयकः-यिका ; इत्यादीनि रूपाणि आदादिकनौतिवत् (683) ज्ञेयानि।

(687) "णेदृ कुत्सासन्निकर्षयोः" (I-भ्वादिः-872. सक. सेट्. उभ.)

'प्रत्येकं निदिनेदोः स्तां नेदते नेदतीत्युभे।

कुत्सायां सन्निकर्षे वा, कुत्सामात्रे तु निन्दति॥' (श्लो. 114) इति देवः। प्रणेदकः-दिका, नेदकः-दिका, निनेदिषकः-षिका, नेनेदकः-दिका ; [B]नेदितः इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। अस्य धातोः उभयपदित्वात् नेदन्-न्ती नेदिष्यन्-न्ती-ती, इत्यादीनि रूपाण्यधिकानि इति विशेषः।

(688) "णेषृ गतौ" (I-भ्वादिः-617. सक. सेट्. आत्म.)

प्रणेषकः-षिका, नेषकः-षिका, निनेषिषकः-षिका, नेनेषकः-षिका ; [C]नेषितः इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। क्विपि प्रणेट्-प्रणेड्-प्रणेषौ-प्रणेषः इति रूपाण्यस्येति विशेषः।

(689) "तक हसने" (I-भ्वादिः-117. अक. सेट्. पर.)

'तकेत् तङ्केद् यथासंख्यं हसने कृच्छ्रजीवने॥' (श्लो. 43) इति देवः। ताककः-किका, ताककः-किका, तितकिषकः-षिका, तातककः-किका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकककतिवत् (139) ज्ञेयानि। अस्य धातोः परस्मैपदित्वात् तकन्-न्ती, तकिष्यन्-न्ती-ती, तितकिषन्-न्ती-ती, तितकिषिष्यन्-न्ती-ती; इति शतरि रूपाणि भवन्तीति विशेषः। [1]तक्यम्, [2]व्यतितकन्-न्ती।

---

1. 'तकिशसिजनिभ्यो यद्वाच्यः' (वा. 3-1-97) इति ण्यदपवादो यत्प्रत्ययः।
2. 'प्रतिषेधे हसादीनामुपसंख्यानम्' (वा. 1-3-15) इति वचनात् कर्मव्यतीहारेऽपि शानज् न। हसादयः=हसनाद्यर्थकाः धातवः।

A. 'नूत्या किं भयधूतविद्रुतगुवल्लोकं तदा तद्ध्रुवत्
कोदण्डं कुवमानमैक्षि दलितं भोजेश्वराकूतवत्॥' धा. का. 2.82.

B. 'या नेदितोर्वीपरिशर्धिवीचीविमृद्धवृक्षादिविबोध्यशैत्या॥' धा. का. 2.26.

C. 'येषणाप्तहरिजेषसंभ्रमान्नेषितस्मृतिरपेषितो रथात्॥' धा. का. 1.78.